रोहिणीतारकायुक्ता रजनी धनघोरिता ।
घूमयोनौ तड़िद्युक्ते वारि वर्षति सर्व्वदा ॥
तस्यां जातो जगन्नाथः कंसारिर्व्वसुदेवजः ।
वैराटे नन्दपत्नी च यशोदाजीजनत् सुताम् ॥
पुत्त्रं पद्मकरं पद्मनाभं पद्मदलेक्षणम् ।
रम्यं चतुर्भुजं शान्तं शङ्खचक्रगदाधरम् ॥
तदा क्रन्दितुमारेभे दृष्ट्वा चानकदुन्दुभिः ।
तत्रैव वाण्यभूद्दैवी देवकीमात्रगोचरा ॥
पुत्त्रं दत्त्वा यशोदायै कन्यां तस्याः समानय ।
कंसासुरभयात्त्वं हि उवाच देवकी तदा ॥
वैराटं गच्छ विप्रेन्द्र ! सुतं प्रत्यर्पितुं प्रभो ! ।
पुत्त्रं दत्त्वा यशोदायै सुतां तस्याः समानय ॥
तां दृष्ट्वा कंसराजोऽपि सभार्यां न हनिष्यति ।
तस्या वचः समाकर्ण्य वसुदेवोऽतिदुःखितः ॥
अङ्के कुमारमादाय वैराटाभिमुखं ययौ ।
यमुना जलसंपूर्णा तत्पथे मध्यवर्त्तिनी ॥
अतिश्रोता महावीर्य्या सुतीक्ष्णोर्म्मिभयाकुला ।
तां दृष्ट्वा तत्तटे स्थित्वा यमुनामवलोकयन् ॥
वसुदेवोऽतिदुःखार्त्तो विलोलचेतनोऽभवत् ।
किं करोमि क्व गच्छामि विधिनात्रापि वञ्चितः ॥
कथमद्य गमिष्यामि वैराटे नन्दमन्दिरम् ।
हरिणा तत्र सानन्दं मायया वञ्चितः पिता ॥
क्षणमात्रं तटे स्थित्वा यमुनामप्यलोकयत् ।
तेन दृष्टा पुनः सापि क्षीणा जानुवहाभवत् ॥
ततः सोऽपि पुरो दृष्ट्वा धावन्तं खलु जम्बुकम् ।
क्रोड़े कृत्वा सुतं स्वैरं गन्तुं पारं प्रचक्रमे ॥
तं दृष्ट्वा हृष्टचित्तन्तु भगवान् यमुनाजले ।
मायां कृत्वा जगन्नाथो ह्यङ्कात् स पतितः पितुः ॥
तं सुतं पतितं दृष्ट्वा सूर्य्यजाजीवने द्विजः ।
तदा क्रन्दितुमारेभे भाले घात्वा करं दृढ़म् ॥
विधिना वैरिणा ह्यत्र दुःखितोऽहं प्रवञ्चितः ।
त्राहि मां जगतां नाथ ! पुत्त्रं देहि सुरोत्तम ! ॥
जनकं क्रन्दितं दृष्ट्वा कंसारिः कृपया विभुः ।
जलक्रीड़ां समाचर्य्य पितुरङ्केऽवसत् पुनः ॥
यथा तेन द्विजश्रेष्ठो गतवान्नन्दमन्दिरम् ।
सुतं दत्त्वा यशोदायै सुतां तस्याः समानयत् ॥
सुतामङ्के तथा सोऽपि गृहीत्वानकदुन्दुभिः ।
निजागारं पुनः प्राप्य प्रत्यर्प्य तादृशीं सुताम् ॥
प्रतियुज्य पदे लोहमासीत् पूर्व्ववदावृतः ।
देवकी च प्रसूतेति वार्त्ता प्राप्ता सुरारिणा ॥
आनेतुं प्रहितो दूतः सुतं दुहितरञ्च वा ।
चागत्य कंसदूतोऽसौ सुतां नेतुं प्रचक्रमे ॥
बलादङ्कात् समाकृष्य देवकीवसुदेवयोः ।
कंसदूतो गृहीत्वा तां कंसायादर्शयत् पुनः ॥
दृष्ट्वा तां कंसराजोऽपि सभयोऽभूद्दुरासदः ।
शुद्धकाञ्चनवर्णाभां पूर्णेन्दुसदृशाननाम् ॥
दृष्ट्वा कंसो विहस्यन्तीं विद्युत्स्फुरितलोचनाम् ।
आदिदेशासुरश्रेष्ठो वध नीत्वा शिलोपरि ॥
आज्ञां लब्ध्वासुरास्ते तु निष्पेष्टुं तां प्रवर्त्तिताः ।
विद्युद्रूपधरा गौरी जगाम शङ्करान्तिकम् ॥
अन्तरीक्षे क्षणं स्थित्वा कंसं प्रोवाच शङ्करी ।
त्वां हन्तुं गोकुले जातः पूर्व्वशत्रुर्न संशयः ॥
तत्रातिष्ठज्जगन्नाथः कंसारिः सुरकृत्यकृत् ।
क्रीड़ित्वा बालभावेन कंसध्वंसे मनो दधौ ॥
प्राप्तिमात्रेण तं कंसं जघान जगदीश्वरः ।
एतत्ते कथितं राजन् ! कृष्णजन्माष्टमीव्रतम् ॥
य इदं कुरुते राजन् ! या च नारी हरेर्व्रतम् ।
प्राप्नोत्यैश्वर्य्यमतुलमिह लोके यथेप्सितम् ॥
अन्तकाले हरेः स्थानं दुर्लभञ्च गमिष्यति ।
एकेनैवोपवासेन कृतेन कुरुनन्दन ! ॥
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
वत्सरद्वादशे चैव यत् पुण्यं समुपार्ज्जितम् ॥
विफलं तद्भवेत् सर्व्वं पुरा व्यासेन भाषितम् ।
न द्रष्टव्यं सुखं तेषां नराणां न च योषिताम् ॥
जयन्ती न कृता यैस्तु जागरादिसमन्विता ।
श्वानस्ते तु विज्ञेया जयन्तीविमुखा नराः ॥
योषितश्च न सन्देहः सत्योक्तं तव सुव्रते ! ॥"
इति भविष्यपुराणे वशिष्ठदिलीपसंवादे श्रीकृष्णजन्माष्टमीव्रतकथा समाप्ता ॥

जन्मी [न्] पुं, (जन्म अस्त्यस्येति । जन्मन् + "व्रीह्यादिभ्यश्च ।" ५ ।२। ११६। इति इनिः ।) प्राणी । इत्यमरः । १ । ४ । ३० ॥ (यथा, भारविः । ११ । ३० ।
" जन्मिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम् ।
भवान्मास्म वधीत् न्याय्यं न्यायाधारा हि साधवः ॥")

जन्मेजयः, पुं, (जनान् शत्रून् एजयति कम्पयतीति । एज + णिच् + "एजेः खश् ।" ३।२।२८। इति खश् ततो मुमागमात् जनमेजय इति सिद्धे शकन्ध्वादित्वादलोपे साधुः ।) जनमेजयराजः । इति श्रीभागवतम् ॥ (एतन्निरुक्तिर्यथा देवीभागवतस्य । २ । ११ । ४६ श्लोकटीकायाम् ।
"जन्मनैवातिशुद्धेन शत्रूनेजितवान् यतः ।
एजृङ् कम्पने धातोर्हि जन्मेजय इति श्रुतः ॥")

जन्यं, क्ली, (जन्यते इति । जनि + "तकिशसिचतियतिजनिभ्यो यद्वाच्यः ।" इति वार्त्तिकोक्त्या यत् ।) हट्टः । परीवादः । संग्रामः । इति मेदिनी । ये, २५ ॥ (यथा, रघौ ।४।७७।
"तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गणैरभूत् ॥")

जन्यः, पुं, (जायते जनयति वा । जन + "भव्यगेयेति ।"३ । ४ । ६८ । इति कर्त्तरि यत् ।) जनकः । इति मेदिनी । ये, २६ ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ५६ ।
"उग्रतेजा महातेजा जन्यो विजयकालवित् ॥"
देहः । यथा, भागवते । १ । ६ । ३१ ।
"निवृत्तसर्व्वेन्द्रियवृत्तिविभ्रम-
स्तुष्टाव जन्यं विसृजन् जनार्द्दनम् ॥"
जनस्य जल्पः । जन + "मतजनहलादिति ।" ४ । ४ । ६७ । इति यत् । जनजल्पः । इति सिद्धान्तकौमुदी ॥)

जन्यः, त्रि, (जन्यते इति । जन् + णिच् + कर्म्मणि यत् ।) उत्पाद्यः । यथा,—
"जनकस्य स्वभावो हि जन्ये तिष्ठति निश्चितम् ।
यथा श्रीकृष्णपादाङ्कं कालीयवंशमस्तके ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
("जन्यानां जनकः कालो जगतामाश्रयो मतः ॥"
इति च भाषापरिच्छेदे ४५ ॥)
जनयिता । (जनीं वधूं वहति प्रापयति वा । संज्ञायामिति साधुः ।) नवोढ़ाज्ञातिः । नवोढ़ाभृत्यः । वरस्य स्निग्धः । स तु जामातृवत्सलः । इति मेदिनी । ये, २६ ॥ (जनाय हितः । यत् ।) जनहितः । इति व्याकरणम् ॥

जन्या, स्त्री, (जायतेऽस्याम् । जन् + ण्यत् यत् वा । मातृतुल्यत्वादेवास्यास्तथात्वम् ।) मातृवयस्या । इति मेदिनी । ये, २६ ॥ (यथा, रघौ ।६।३० ।
"अथाङ्गराजादवतार्य्य चक्षु-
र्याहीति जन्यामवदत् कुमारी ॥")
प्रीतिः । इति हेमचन्द्रः ॥

जन्युः, पुं, (जायते इति । जन + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणां ३ । २० । इति युच् ।) प्राणी । अग्निः । धाता । इति मेदिनी । ये, २६ ॥ (उत्पत्तिः । जन्म । यथा, हरिवंशे । १२३ । ४६ ।
"अमृताया द्वितीयोऽयं जन्युर्हि मम सर्व्वथा ॥")

जप, व्यक्तवाचि वाचि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) जिह्वोष्ठादिव्यापाररहितं शब्दार्थयोश्चिन्तनं व्यक्तवाचः । जपति मन्त्रं साधकः । इति दुर्गादासः ॥

जपः, पुं, (जप्यते इति । जप + "व्यधजपोरनुपसर्गे ।" ३ । ३ । ६१ । इति भावे अप् ।) विधानेन मन्त्रोच्चारणम् । तद्विधिर्यथा,—
"नोच्चैर्ज्जपञ्च संकुर्य्यात् रहः कुर्य्यादतन्द्रितः ।
समाहितमनास्तूष्णीं मनसा वापि चिन्तयेत् ॥
विधियज्ञात् जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ।
विना दर्भैस्तु यत् स्नानं यच्च दानं विनोदकम् ।
असंख्येयन्तु यज्जप्यं सर्व्वं तदफलं स्मृतम् ॥
मुक्ताफलैर्विद्रुमेण रुद्राक्षैः स्फाटिकेन वा ।
गणना सर्व्वथा कार्य्या सम्यगङ्गुलिपर्व्वभिः ॥
हिरण्यरत्नमणिभिर्जप्यं शतगुणं भवेत् ।
सहस्रगुणमिन्द्राक्षैः पद्माक्षैरयुतं भवेत् ॥
नियुतं वापि रुद्राक्षैर्भद्राक्षैस्तु न संशयः ।
पुत्त्रजीवकजप्यस्य परिसंख्या न विद्यते ॥
दशभिर्जन्मजनितं शतेन च पुरा कृतम् ।
त्रियुगं तु सहस्रेण गायत्त्र्या हन्ति दुष्कृतम् ॥
दर्भहस्तस्तथासीनो दर्भैर्युदकपाणिना ।
प्राङ्मुखो वर्त्तयेत् मालां सहस्रं शतमेव वा ॥"
इत्याद्ये वह्निपुराणे नित्याह्निकस्नानविधिनामाध्यायः ॥ तस्यानुष्ठानं यथा,—
"मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ।
न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपङ्क्तिवत् ॥
जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ॥